सम्बन्धेन, त्रिषडायेशस्य सम्बन्धाभावाच्च विशेष-शुभफलकारकाः ग्रहाः त्रिषडायेशस्य सम्बन्धत्वेन मिश्रितफलकाः भवन्ति।

क्षेमङ्करी - केन्द्र और त्रिकोण के स्वामियों का परस्पर सम्बन्ध होने से विशिष्ट शुभ फल कहा गया है। वहीं यदि वे त्रिषडायेश से सम्बन्ध करें, तो मिश्रित फल देते हैं। अर्थात कभी शुभ कभी अशुभ फल करते हैं।

विमर्श - केन्द्र और त्रिकोण के स्वामी परस्पर यदि सम्बन्ध करते हैं या योगकारी हों, तो अत्यन्त शुभ फल करते हैं। लेकिन ऐसा तभी होता है जब वे त्रिषडायेश (३,६,११) के स्वामी या अष्टमेश से सम्बन्ध नहीं रखते हों। यदि सम्बन्ध रखते हों, तो शुभफल में कमी होता है या मिश्रित फल करते हैं। उक्त योग यदि केन्द्र व त्रिकोण में ही बने तो उत्तम है या लग्न, द्वितीय, द्वादश स्थान में बने तो भी अच्छा, त्रिषडाय में शुभ राशि हो उसमे बने, तो मध्यम और अशुभराशि में या अष्टम स्थान में बने तो निकृष्ट फलदायी होता है।

डॉ० सुदिष्ट कुमार
सहा० प्राचार्य (ज्योतिष)
रा० उ० सं० महावि० सुखसेना,
पूर्णियाँ।

वस्तुनिष्ठप्रश्नाः

शास्त्री-I, II

Date 18.08.20
Page 3

(1) क्षुधालुः बहुभोजी च किम्प्रकृतिको मनुष्यः?

उत्तरम्- वायुप्रकृतिकः।

(2) मधुरभाषी पुरुषः किम्प्रकृतिकः?

उत्तरम्- जलप्रकृतिकः।

(3) कार्यकौशलः पुरुषः किम्प्रकृतिकः?

उत्तरम्- आकाशप्रकृतिकः।

(4) राक्षसपिशाच्यप्रकृतिकः कीदृशः पुरुषः?

उत्तरम्- बहुभाषी।

(5) मलिनः पुरुषः किम्प्रकृतिकः?

उत्तरम्- पिशाच्यप्रकृतिकः।

(6) तिर्यक्प्रकृतिकः पुरुषः कीदृशः?

उत्तरम्- भीरुः।

(7) के मनुष्या राजानः भवन्ति?

उत्तरम्- शार्दूलतुल्यगतिकः।

(8) शार्दूलहंससमदद्विपगोपतीनां तुल्याः भवन्ति गतिभिः शिखिनाञ्च भूपाः।
येषाञ्च शब्दरहितं स्तिमितञ्च यातं तेऽपीश्वराः द्रुतपरिप्लुतगा दरिद्राः।।

इति कस्य कथनम्?

उत्तरम्- वराहमिहिरस्य।

(9) कः पुरुषः भाग्यशाली कथ्यते?

उत्तरम्- यस्य भयकाले रक्षा भवति।

(10) श्रान्तस्य यानमशनं च बुभुक्षितस्य पानं तृषापरिगतस्य भयेषु रक्षा।
एतानि यस्य पुरुषस्य भवन्ति काले धन्यं वदन्ति खलु तं नरलक्षणज्ञाः।।

इति कुतः गृहीतम्?

उत्तरम्- बृहत्संहितातः।

(11) कति प्रशस्तपुरुषाः?

उत्तरम्- पञ्च।

(12) हंसयोगो कदा जायते?

उत्तरम्- स्वोच्चे स्वभे केन्द्रगे गुरौ।

P.T.O

लघुपाराशरी

उपशास्त्री

18.08.20

अथात्र सामान्य योगानाह —

केन्द्रत्रिकोण पतयः सम्बन्धेन परस्परम्।
इतरैरप्रसक्ताश्चेद्विशेष फलदायकाः॥

अन्वयः - केन्द्र त्रिकोणपतयः चेत् इतरैः अप्रसक्ताः, तर्हि परस्परं सम्बन्धेन विशेष फलदायकाः भवन्ति।

संस्कृत - केन्द्र त्रिकोण पतय इति केन्द्रपतयश्च त्रिकोण पतयश्च तत्र केन्द्राणि १,४,७,१० स्थानानि तत्पतयश्च त्रिकोणानि नवमपञ्चमस्थाने तत्पतयश्चेति केन्द्रत्रिकोणपतयः चेद्यदि इतरैः केन्द्रकोणयोरतिरिक्त स्थानस्वामिभि त्रिषडायेशादिभिरप्रसक्ताः सम्बन्धरहिताः तर्हि परस्परं मिथः सम्बन्धेन संयोगेन विशेषफलदायकाः भवन्ति। अर्थात् सम्बन्ध सहिताः तर्हि सामान्य शुभफलदायका इति कथितमत्रास्ति। एवं तत्र त्रिकोणेशाः शुभफलकारकाः त्रिषडायेशाश्च पापफलदाः भवन्ति। केन्द्राधिपतयः शुभग्रहाः शुभदाः, पापग्रहाः अशुभदा इति पूर्वोक्ताः। चेत् शुभग्रहाः केन्द्राधिपतित्वेन त्रिषडायाधिपतित्वेन त्वशुभफलकारकाः भवन्ति, परञ्च पापाः तदनुरूपत्वे सति केन्द्रत्रिकोणाधिपतित्वेन शुभफलदा भवन्ति। पुनश्च यदि शुभग्रहाः केन्द्राधिपतित्वेन त्रिकोणेशाधिपतित्वेन तु शुभफलदाः तदा तदनु रूपत्वे सति पापाः केन्द्रेशत्वेन त्रिषडायेशत्वेन तु पापफलदाः भवन्ति द्वितीयद्वादशाधीशौ त्रिकोणपतित्वेन सम्बन्धत्वेन तु शुभौ, त्रिषडायेशत्वेन सम्बन्धत्वेन त्वशुभौ। केन्द्राधिपतिः शुभग्रहसंयोगेन शुभदः पापग्रहसंयोगेनाशुभः, तत्रावष्टमेशेन सम्बन्धेनात्यशुभः। अतः सूर्याचन्द्रमसौ हित्वा सर्वेग्रहाः द्वयोः राशयोः स्वामिनो भवन्ति। तस्मात्कारणाच्च द्वितीयद्वादशेशौ त्रिकोणेशत्वेन शुभौ, त्रिषडायेशत्वेनाशुभौ। शुभग्रहस्य केन्द्रेशत्वेन शुभदः, पापग्रहस्य केन्द्रेशत्वेनाशुभदश्च भवन्ति। अतस्व तत्रत्य केन्द्रकोणयोः मिथः

P.T.O

(13) केन शशयोगो जायते?

उत्तरम्- सौर्येण ।

(14) रुचकयोगः कस्माज्जायते?

उत्तरम्- भौमेन ।

(15) भद्रयोगः केन ग्रहेण भवति?

उत्तरम्- बुधेन ।

(16) स्वक्षेत्रे तु चतुष्टयेऽथ बलिभिः स्वच्चोच्चस्थितैर्वा ग्रहैः
शुक्राङ्गारकमन्दजीवशशिजैरेतैर्यथापक्रमम् ।
मालव्यो रुचकः शशोऽथ कथितो हंसश्च भद्रस्तथा
सर्वेषामतिविस्तरान्मुनिमतात् सङ्क्ष्यते लक्षणम् ॥
इदं पद्यं कुत्रास्ति?

उत्तरम्- सारावल्याम् ।

(17) पूर्णसत्त्ववान् कस्य बलेन भवति नरः?

उत्तरम्- सूर्यबलेन ।

(18) मनसा बलवान् केन बलेन भवति नरः?

उत्तरम्- चन्द्रबलेन ।

(19) महीसुतात्सत्त्वमुदाहरन्ति गुरुत्वमिन्दोस्तनयाद्गुरोश्च ।
स्वरः सितात्स्नेहमतोऽनुवर्णं बलाबलैः पूर्णलघूनि चैषाम् ॥
इति पद्यं कुत्राऽस्ति?

उत्तरम्- सारावल्याम् ।

(20) हंसपुरुषस्योन्नतं कियदङ्गुलपरिमितं भवति?

उत्तरम्- षण्णवत्यङ्गुलपरिमितम् ।

(21) उच्छ्रायः परिणाहस्तु यस्य तुल्यं शरीरिणः ।
स नरः पार्थिवो ज्ञेयो न्यग्रोधपरिमण्डलः ॥
इति कस्य वाक्यम्?

उत्तरम्- पराशरस्य ।

डॉ० सुदिष्ट कुमार
सहा० प्राचार्य (ज्योतिष)
रा०उ०सं० महावि० सुखसेना, पूर्णि